International Journal of Sanskrit Research 2024; 10(3): 86-91

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2024; 10(3): 86-91
© 2024 IJSR
www.anantaajournal.com
Received: 26-02-2024
Accepted: 30-03-2024

**Shivasharana Sidramayya Shekha**
Research Scholar, P.G
Department of Sanskrit,
Karnatak University, Dharwad,
Karnataka, India

**Dr. Rajani H**
M.A., Ph.D (Sanskrit).,
M.A. (Prakrit), Head and Asst.
Professor (Research Guide),
Dept. of Sanskrit, Karnatak Arts
College, Dharwad, Karnataka,
India

**Corresponding Author:**
**Shivasharana Sidramayya Shekha**
Research Scholar, P.G
Department of Sanskrit,
Karnatak University, Dharwad,
Karnataka, India

# विभूतियोगे प्रकृतौ भगवतः निगूढत्वम्

**Shivasharana Sidramayya Shekha and Dr. Rajani H**

## प्रस्तावना

संस्कृतसाहित्ये बहवः कोषग्रन्थाः उपलभ्यन्ते। यथा अमरकोषः, शब्दकल्पद्रुमः, वाचस्पत्यम्, शब्दसागरः, आप्टेकोषः इत्यादि। तत्र प्रथमं मया विभूतिः इत्यस्य पदस्य उत्पत्तिक्रमः कः? कः अस्य अर्थः? एषः शब्दः कस्मिन् लिङ्गे प्रयुक्तः? इत्येवं विचाराः विस्तरेण आदौ उपस्थाप्यन्ते।

एषः शब्दः कस्मिन् लिङ्गे प्रयुक्तः इति जिज्ञासायां शब्दकल्पद्रुमः इत्याख्ये कोषग्रन्थे भणितं विभूतिः इत्येतत् स्त्रीलिङ्गे प्रयुक्तम् इति। वि उपसर्गपूर्वक भूसत्तायां इति धातोः क्तिन् प्रत्ययान्तं रूपं विभूतिरिति। एवं अस्य उत्पत्तिक्रमः अत्र कथितः वर्तते। सुलभतया वि+भू+क्तिन् प्रत्ययः एषः क्रमः स्मर्तुं सुलभः इत्याशास्य दर्शितम्। कः अस्य अर्थः स्यात् विभूतिपदस्य इति चेत् १. भूतिः २. ऐश्वर्यम् ३. अणिमादिकमष्टधा एते विभूतेः पर्यायवाचकाः लक्ष्यन्ते। तदुक्तम् अमरकोषे –

विभूतिर्भूतिरैश्वर्यमणिमादिकमष्टधा।
अणिमा महिमा चैव गरिमा लघिमा तथा।
प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्ट सिद्धयः॥ [1]
पुनश्च विभिन्न ग्रन्थेषु अपि विभूतिशब्दस्य एवं प्रकारेण प्रयोगः कृतः वर्तते।

विभूतिरस्ति सूनृता। [2] विभूतिर्लक्ष्मीः इत्यर्थः। एवाहिते विभूतय इन्द्रमावते। [3] अर्थात् सायणाचार्यः अस्य वाक्यस्य विषये एवं प्रकारेण भाष्ये भणति यत् - विभूतयः ऐश्वर्यविशेषाः इति। पुनश्च तत्रैव ऋग्वेदे एवं भणितं रयिर्विभूरीयते वचस्या। [4] अस्य वाक्यस्य व्याख्यानं एवं प्रकारेण कृतं भगवता सायणाचार्यैः - विभूतिः जगतः विभवहेतुः इति।

शक्तित्रयसमेतया मीढुषे अहंकृतात्मने।
चेत आकूतिरुपाय नमो वाचोविभूतये॥ [5]

इत्येवं प्रकारेण कोषग्रन्थेषु विभूतिपदस्य परामर्शः कृतः। शिवधृतभस्मः इत्यपि विभूतिपदस्यार्थः विद्यते। अस्य शिवस्य अणिमाद्यष्टप्रकारं वैभवं विभूत्यादिपदत्रयं वाच्यं केचित्तु विभूतिर्भूतिरिति द्वयं शम्भुधृतभस्मनि अणिमाद्यष्टके तु ऐश्वर्यमित्याहुः। विभत्यनया इति विभूतिः। अस्य पदस्य व्युत्पत्तिक्रमः एवं विद्यते। क्तिः भवतेः क्तिः, भूतिः विग्रहणं अन्योपसर्गनिरासार्थं ईश्वरगुणैश्वर्यं भावे ष्यञः अणिमादि लघिमादि।

अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा।
ईशित्वञ्च वशित्वञ्च तथा कामावशायिता।[6]

1. अणुत्वं अणिमा, येन सूक्ष्मो भूत्वा विचरति।
2. लघुत्वं लघिमा, येन वायुरिव लघुतरो भवति।
3. प्राप्तिः अर्थात् अभीप्सितप्रापणं इत्यर्थः
4. प्राकाम्यं इच्छानभिघातः इति।
5. महिमा महत्वं येन चतुर्दशभुवनानि अस्य उदरे वर्तन्ते।
6. ईशित्वं नाम प्रभुता इत्यर्थः। प्रभुता कुत्र इति विवक्षायामाह - प्रभुत्वं तु स्थावर-जङ्गमादि भूतानां आदेशकरणे इति।
7. वशित्वं नाम स्वातन्त्र्यं इति यावत्।

वशित्वं इति पदस्य इदानीं अर्थविस्तारः क्रियते। वशित्वं गुणाधानेन मानवः स्वतन्त्रश्चरति। कामेन इच्छया अवशायितुं स्थातुं शीलमस्य कामावशायी शीङो ग्राहादित्वण्णिन्, तस्य भावः कामावशायिता। सर्वानन्दस्य अनेकार्थत्वात् धातूनां स्मृतिरिह तिष्ठति इत्यर्थः। अवशायी दन्तमध्य इत्याह।

परात्परतरं तत्त्वं परं ब्रह्मैकमव्ययम्।
नित्यानन्दं स्वयं ज्योतिरद्वयं तमसः परम्।
ऐश्वर्यं तस्य यन्नित्यं विभूतिरिति गीयते॥

प्रकृतेर्निगूढो भगवान्
ज्योतिषां रविरंशुमान्

अंशुमान् सूर्यस्य दशमी मूर्तिः।
दशमी तस्य या मूर्तिरंशुमानिति विश्रुता।
वायुप्रतिष्ठिता सा तु प्रह्लादयति वै प्रजाः॥

अंशुमान् इत्येतावतैव निर्वाहे रविपदोपादानं सगरमप्तुरंशुमतः व्यावर्तनार्थम्।

योऽसमञ्जस इत्युक्तः सः केशिव्या नृपात्मजः।
तस्य पुत्रोंऽशुमान्नाम पितामहहिते रतः॥[7]

ज्योतिः शब्देन प्रकाशः इत्यर्थः ग्राह्यः। स च प्रकाशः द्विविधः। १. स्वतः प्रकाशः २. परतः प्रकाशश्चेति। तत्र केचन स्वयं प्रकाशवन्तः सन्तः लोकान् प्रकाशयन्ति। केचन अन्यतः प्रकाशं स्वीकृत्य लोकमन्धकारतः निवारयन्ति। एतादृशज्योतिष्मन्तः लोके नक्षत्र-चन्द्र-ग्रह-तारादयः बहवः सन्ति। तत्र ग्रहादयः सर्वेऽपि सूर्यतः प्रकाशं प्राप्नुवन्ति। अतः रविः एव समेषां ग्रह-चन्द्र-नक्षत्रादीनां चोदकः प्रकाशकः च विद्यते। सः रविरेव समग्रस्य स्थावरजङ्गमात्मकस्य लोकस्य चक्षुः इव प्रतिभाति। जगतः चक्षुषश्चक्षुः। रवेः प्रामुख्यं ख्यापयन्ति ज्योतिषां पतये नमः इति प्रकारेण। लोकान् पाति गभस्तिभिः इति च। भणितम् ईशावास्योपनिषदि –

पूषन्नेकर्षे यम-सूर्य-प्राजापत्यव्यूहरश्मीन्थसमूह।
यत्ते रूपं कल्याणतमं तत्ते पश्यामि योसावसौ पुरुषः
सोऽहमस्मि।[8]

लोके सस्यादीनां फल-पुष्प-पत्र-आहारादीनाम् उत्पादनार्थं सूर्यस्य अंशवः एव कारणानि भवन्ति। तस्माद्धेतोः अपि रविः मम विभूतिषु ज्योतिर्गणेषु श्रेष्ठः विद्यते।

रवी राजा शशी राज्ञी मङ्गलो मण्डलाधिपः।[9]
अहं राजा शशी राज्ञी नेता भूमिसुतः।[10]

नक्षत्राणां शशी - नक्षत्राण्यविनाद्या दक्षकन्याः। हरिवंशस्य कथानुसारं दक्षप्रजापतिः सप्तविंशति स्व दुहितृः सोमाय दत्वा विवाहं चकार।

सप्तविंशतिमिन्दोस्तु दाक्षायण्यो महावृताः।
ददौ प्रचेतसो दक्षः नक्षत्राणीति या विदुः॥ [11]

तथा च द्विजानां वीरुधां चैव नक्षत्रग्रहयोगस्तथा। यज्ञानां तपसां चैव सोमं राज्येभ्यषिचयेत्। नक्षत्राणानाथः समुपजगाम इति यावत्। यद्यपि चन्द्रः नक्षत्रकोटौ नान्तर्भवति तथापि पुराणेतिहासप्रसिद्धा समस्ताश्विन्यादि नक्षत्राणाम् अधिपः शशीति ख्यापयन्ति। तथा रात्रिकाले लोकं प्रकाशयति।
तासां नक्षत्रसंज्ञानिदानं चन्द्रपत्नित्वं च स्कन्दे –

न क्षान्ति तपोऽत्युग्रमेतदन्याभिरीदृशम्।
पुराबलाभीस्तस्माद्धौ नाम नक्षत्रमत्र वै॥ [12]
ओषधीनां सुधायाश्च ब्राह्मणानां च य पतिः।
पतिमत्यो भवेत्येपि तेन प्राप्या शुभाननाः॥ [13]

अथवा नक्षन्ति सततं गच्छन्तीति नक्षत्राणि ब्रह्मादयः। क्षण-गतौ। [14]
तथा च सूर्येऽपि नक्षत्रशब्दः श्रूयते –

अग्ने नक्षत्रमजरमासूर्य रोहयो दिवि[15] इति।
अतः सततं गच्छतां तेषां मध्ये चन्द्रमा इति निर्धारणम्।

चन्द्रमा हि अर्कस्य संवत्सरभुक्तिं पक्षाभ्यां मासभुक्तिं
सपादक्षाभ्यां दिनेनैव पक्षभुक्तिमग्रचारी द्रततरगमनो भुङ्के। [16]

ननु पूर्वापरेषु सर्वेषु निर्धारणार्थेषु मध्ये कस्यचित्सम्बन्धमात्रपरत्वं अयुक्तम्। नक्षत्रशब्देन निशि प्रकाशमानं छत्रिन्यायेन ग्राह्यम्। सुकृतां वा एतानि ज्योतींशि यन्नक्षत्राणि। [17] श्रुतेश्चन्द्रमण्डलस्यापि वा स्वर्गिणां भोगस्थानत्वात् नक्षतृत्वम्।

यो वा इह याजते अमुं स लोकं न क्षते तन्नक्षत्राणां नक्षतृत्वं देवगृहा वै नक्षत्राणि। [18]

शिखरिणां मेरुः - मिनोति क्षिपति ज्योतींषि इति मेरुः।

देवर्षिगन्धर्वयुतः प्रथमः मेरुरुच्यते।
प्रागायतः ससौवर्ण उदयो नाम पर्वतः॥
मेरुश्रुङ्गो इवोच्छ्रितः।

महभारतस्य आदिपर्वणि अस्य विषये एवं भणितम् –

ज्वलन्तमचलं मेरुं तेजोराशिमनुत्तमम्।
अक्षिपन्तं प्रभां भानोः स्वश्रुङ्गैः काञ्चनोज्वलैः॥ [19]
कनकाभरणं चित्रं देवगन्धर्वसेवितम्।
अप्रमेयमनाधृष्यं अधर्मबहुलैर्जनैः॥ [20]
व्यालैरावारितं धोरैर्दिव्यौषधिविदीपितम्।
नाकामावृत्य तिष्ठन्तमुच्छ्रयेण महागिरिम्॥
अगम्यं मनसाप्यन्यैर्नदीवृक्षसमन्वितम्।
नानापतङ्गसङ्घैश्च नादितं सुमनोहरैः॥ [21]
तस्यश्रुङ्गमपारुह्य बुहरत्नाचितं शुभम्।
अनन्तकल्पमद्वन्दं सुरास्सर्वे महौजसः॥ [22]
ते मन्त्रायितुमारभ्यास्तत्रासीना दिवौकसः। [23]

श्रौतस्तात्ब्रवीति सप्तसु पर्वतेषु सुप्रसिद्धः मेरुः इति। कानि तानि सप्तपर्वतानि - महेन्द्रो मलयस्सह्यो शुक्तिमान् ऋक्षपर्वतः।

विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः॥ [24]

एवं येषु सप्तसु मेरुरेव श्रेष्ठः। हे शौनक, मेरुपर्वतः स्वतेजसा अग्निरिव जाज्वल्यमानः इव प्रतिभाति। तस्मात्सः तेजोरविरिति आख्यायते। मेरुः सुवर्णमयः विद्यते। सुवर्णमयत्वात् जाज्वल्यमानत्त्वाच्च एषः पर्वतः सूर्यरश्मीन् आक्षिपन्तमिव अवभासते। न कोपि जानाति सुवर्णमयस्य अस्य दीर्घताम्। अस्मिन्पर्वतभागे विषसर्पाः वसन्ति। एषः पर्वतः दिव्यौषधिलतया युक्तः सन् वैद्यः इव लक्ष्यते लौकिकानां जनानाम्। एनं पुरुषः मनसापि आरोढुं न शक्नोति किमुत सशरीरः। एतस्मिन् सुवर्णश्रुङ्गे पर्वते देवाः महौजस्काः मन्त्रालोकनं, मन्त्रपठनञ्च कुर्वन्तीति श्रूयते पुराणेषु ग्रन्थेषु। मेरुपर्वतः सृष्टिकर्तुः ब्रह्मणः आवासस्थानमित्युच्यते। ब्रह्मणा मानसपुत्राणां सप्तमहर्षीणाञ्च प्रतिष्ठानमत्रैवेति श्रूयते।

उदीच्यां दीपयन्तेषः दिशे तिष्ठति वीर्यवान्।
महामेरुर्महाभागः शिवो ब्रह्मविदां गतिः॥
यस्मिन्ब्रह्म सदश्चैव भूतात्मा चावतिष्ठते।
प्रजापतिः सृजन्सर्वं यत्किञ्च जङ्गमागमम्॥
यामाहुब्रह्मणः पुत्रान्मानसान्दक्ष सप्तमान्।
तेषामपि महामेरुः शिवं स्थानमयम्॥
अत्रैव प्रतिष्ठन्ति पुनरेवोदयन्ति च।
सप्तदेवर्षयस्तात वसिष्ठप्रमुखाः सदा॥
देशं विरजसं प्राप्य मेरोः शिखरमुत्तमम्।
यत्रात्मतृप्तैरध्यास्ते देवैः सः पितामहः॥

एवं च पूर्वापरावलोकनेन ज्ञायते मेरुः श्रेष्ठः शिखरिणामिति। अतः भगवान् ब्रवीति मेरुः शिखरिणामिति।

**मासानां मार्गशीर्षः** मासानां द्वादशनां मध्ये अभिनवशाली वास्तूकशाकादिशाली शीतातपशून्यत्वेन च सुखहेतुः मार्गशीर्षः। यद्वा सस्यादि सम्पन्नत्वेन सुखजनकः मार्गशीर्षः। पुनश्च मासाः तावत् चन्द्रमासेन भवन्ति चन्द्र-नक्षत्रनामकाश्च यथा यस्यां पौर्णमास्यां चित्रनक्षत्रं सः चैत्रमासः। तद्वद्विशाखाद्यैर्वैशाखादयः। प्रकृते तु मृगशिरः सम्बन्धान्मार्गशीर्षः। एवं मृगशिरः स्वामी चन्द्रस्तथा, स्वनामनक्षत्रसमानननाथा मासाः इत्युक्तत्वात् मासेशोऽपि मार्गशीर्षः एव, पूर्णिमास्वामी मर्गशीर्षः एव। एवं मासनक्षत्रतिथिनामेकदैवत्वेन पुण्यतमत्वं मार्गशीर्षस्य। यद्वा मृगशिरः पूर्णिमा सम्बन्धेन वर्षादिरभिहितः तस्मिन्नेवाग्रहायणि आग्रहायणं यस्याः साऽग्रहायणी मार्गशीर्षः इत्यर्थः।

मार्गशीर्षं तु यो मासमेकभक्तेन संक्षिपेत्[25] इति मार्गशीर्षारभैव फलविशेषाद्यभिहितम्। विष्णोद्वादशके द्वादश्यां मार्गशीर्षे तु अहोरात्रेण केशवम्।[26] अन्यत्र च मार्गशीर्षस्य मासस्य चन्द्रोमूलेन संयुते[27] इत्यादौ मार्गशीर्षस्यैव प्राथम्यं दृश्यते। एवं मासानां पूगे मार्गशीर्षः श्रेष्ठः, सः मम विभूतिः इति पर्यवसितम्।

ऋतूनां वसन्तः - ऋतूनां षण्णां मध्ये कुसुमाकरं सर्वसुगन्धिकुसुमानामाकरोऽतिरमणीयो वसन्तः। वसन्तस्य श्रेष्ठतां श्रुतिरपि प्रदर्शयति - वसन्ते ब्राह्मणमुपनयीत। वसन्ते ब्राह्मणोऽग्निनादधीत। वसन्ते वसन्ते ज्योतिषा यजेत। तद्वै वसन्त एवाभ्यारभेत वसन्तो वै ब्राह्मणस्यर्तुः[28] इत्यादि। शास्त्रेणापि ब्रह्मधर्मसम्बन्धितया अभिधीयमानत्वात् श्रेष्ठोऽहं वसन्तः। ऋतूनां वसन्तः । मुखं वा एतदृतूनाम्। यद्वसन्तः।[29] कुत्सितां सुष्ठुभूतां च मां ज्ञानं करोतीति कुसुमाकरनाम। अन्यऋतुभ्यः आधिक्यहेतुना अर्थात् पत्र-पुष्प-फलादिभिः पूरणत्वहेतुना वसन्तऋतुभ्यः। एवं षड्षु ऋतुषु अहं वसन्तः इति भगवद्वचसि अस्ति प्रामाण्यम् आस्तिकेषु।

आयुधानां वज्रम् - श्रीकृष्णः गीतायां वक्ति आयुधानां वज्रमिति। किं स्यात्तत्र निमित्तं इति चेत् ज्ञायते धनुः प्रहरणं श्रेष्ठमिति उल्लिखितम्। अग्र्य प्रहारमाणानां च खड्गो माद्रवतीसुतः।[30] एवं प्रकारेण खड्गस्यापि आयुधेषु प्राधान्यं प्रदीयते। तथापि खड्ग-वज्रयोर्मध्ये प्रविश्यासौ सम्स्थितो भगवान् हरिः।[31] नन्वेशः वज्रस्तव शक्रः हरेर्दधीचेस्तपसा च तेजिनः।[32] आयुधानामिति अर्वाचीनायुधपरम्। सुदर्शनाद्यपेक्षया दधीचेः अस्थिसम्भवस्य वज्रस्य श्रेष्ठत्वं प्रतिपादितम्। पुनश्च वज्रैव भगवत्तेजः

प्रवेशदर्शनात् तस्यैव विभूतित्वं वज्रस्वरूपं श्रुतौ एवं प्रतिपादितम् - त्वष्टा यद्वज्रं सुकृतं हिरण्ययं सहस्रभृष्टिं स्वापवतर्पयत्।[33] अष्टाश्रिवै वज्रः।[34]

आयुधः द्विधा विभक्तः। शस्त्रं पुनश्च अस्त्रं चेति। विना हस्तेन यदुपयुज्य शतृणां संहारः क्रियते तत् अस्त्रमिति व्यवह्रियते। शस्त्रं नाम यमायुधं हस्तैव गृहीत्वा यत्र युद्धमाचर्यते तमायुधं शस्त्रमिति पदेनाभिधीयते। वज्रस्यैषः विशेषः यदिदं शस्त्रास्त्र-उभयरूपेण प्रयोक्तुं शक्यते। एवञ्च वज्रं श्रेष्ठम्। तस्माद्धेतोः भगवद्विभूतित्वेन निदानम्।

स्रोतसां जान्हवी - बह्व्यः नद्यः प्रवहन्ति अस्यां त्यागभूमौ। नदीनां गङ्गायाः महात्म्यं वक्ति एवं प्रकारेण भगवान् श्रीकृष्णः। नद्यः विश्वस्य मातरः इत्यपि व्यवह्रियते लोके। प्रमुखनदीनां सरणौ प्रथमा एषा गङ्गा।

गङ्गे च यमुने चैव गोदावरि सरस्वती।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु॥

गङ्गायां तस्यां स्नातारं स्वर्गलोकं गमयतीति अस्ति विश्वासः। तस्माद्धेतोः गङ्गोदकमिति प्रसिद्धम्। न केवलं गङ्गा प्रवहति तया सह संस्कृतिरपि प्रवहति। गङ्गा पानं तुङ्गापानमिति प्रसिद्धा लोकोक्तिः। गङ्गायाः सीमोल्लङ्घनं नाम जनन-मरणचक्रस्य संसारस्य लङ्घनमित्यर्थः। अर्जुन-गन्धर्वणः सम्भाषणे गङ्गायाः श्रैष्ठ्यं ब्रवीति धनञ्जयः।

समुद्रे हिमवत्पार्श्वे नद्यामस्यां च दुर्मते।
रात्रावहनि सन्ध्यायां कस्य गुप्तः परिग्रहः॥[35]

समुद्रः, हिमवत्पर्वतः, गङ्गानदी एषु स्थलेषु गन्तुं नास्ति कालनियमः। नास्त्यत्र विघ्नकर्ता कश्चन।

पुरा हिमवतश्चैषा हेमश्रुङ्गाद्विनिस्सृता।
गङ्गा गत्वा समुद्राम्भः सप्तधा समपद्यत॥[37]
गङ्गा च यमुनां चैव प्लक्षजातां सरस्वतीम्।
रथस्थां सरयूञ्चैव गोमतीं गण्डकीं तथा॥[38]
अपर्युषितपापास्ते नदीः सप्त पिबन्ति ये।
इयं भूत्वा चैकविप्रा शुचिराकाशगा पुनः॥[39]
देवेषु गङ्गा गन्धर्वा प्राप्नोत्यलकनन्दताम्।
तथा पितृन्वैतरणी दुस्तरा पापमर्मभिः॥[40]
असम्बाधा देवनदी स्वर्गसम्पादनी शुभा।
कथमिच्छसि तां रोद्धुं नैषः धर्मः सनातनः॥[41]

एवं गङ्गा हिमवत्पर्वतात् स्वर्णशिखरात् प्राप्त जन्मा। जन्मकालैव गङ्गा, यमुना, सरस्वती, सरयू, गोमति, गण्डकीति सप्तधा प्रविभक्ता। एषा गङ्गा देवलोके अलाकानन्देति, पितृलोके वैतरणी, भूलोके गङ्गेति प्रसिद्धा। तस्माद्धेतोः एषा त्रिलोकपावनी, त्रिपथगा इत्यपि आख्यायते। अस्याः वैशिष्ट्यं अस्ति यत् अस्याः स्पर्शनमात्रेण सकलविधपापानां निवारणं भविष्यति इति।

ततो हि यजमानस्य जन्होरुद्भूतकर्मणः।
गङ्गासम्प्लावयामास यज्ञवाटं महात्मनः॥

इत्येवं गङ्गायाः वैशिष्ट्यं ज्ञातुं शक्नुमः।

तस्यावलेपनं कृत्वा कृद्धो जन्हुश्च राघव।
अपिबन्तु जलं सर्वं गङ्गायाः परमाद्भुतम्॥
ततो देवा सगन्धर्वा ऋषयश्च सुविस्मिताः।
पूजयन्ति महात्मानं जन्हुं पुरुषसन्ततम्॥
गङ्गां चापि नयन्तिस्म दुहितृत्वे महात्मनः।
ततस्तुष्टो महातेजः श्रोताम्भामसृजत्प्रभुः॥
तस्मत् जन्हु स्तुता गङ्गा प्रोच्यते जान्हवीति।

**वृक्षाणाम् अश्वत्थः** - सर्ववृक्षाणां मध्ये पूज्यः अश्वत्थः एवाऽहम्।

तेजो वा एष वनस्पतिरजायत। यदश्वत्थः साम्राज्यं वा
एतद्वनस्पतीनाम्।[42] अश्वत्थरूपी भगवान् विष्णुरेव न संशयः।

एवं ख्यापितं बहुत्र अश्वत्थस्य भगवद्रूपत्वम्। अश्वत्थस्य माहात्म्यावगमनार्थं च गौरीशापकथा च अनुसन्धेया। ननु सर्ववृक्षाणामित्येतदनुपपन्नं पारिजातादपेक्षया अश्वत्थस्य निकृष्टत्वात् इति चेत् न, पूज्यत्वात्। पारिजातादीनां पूज्यस्त्वं दृश्यते चेदपि अश्वत्थवत् पूज्यस्त्वं नास्ति। सर्वशब्देन वनस्पतयः गृह्यन्ते। प्रस्तुते अस्माभिः लोके दृष्टं यत् आयुर्वेदचिकित्सा शास्त्रे अपि अश्वत्थस्य फल-पत्र-शाखादीनाम् उपयोगः क्रियते। स्त्रीणां गर्भधारणसामर्थ्यं अपि वर्धयति।

मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे।
अग्रतः शिवरूपाय वृक्षराजायते नमः॥

**References**


1. अमरकोषः – स्वर्गवर्गः – ४१-४२ (पृष्ठ – ९)।
2. ऋग्वेदः १.३०.५।
3. ऋग्वेदः १.८.९।
4. ऋग्वेदः ६.२१.१।
5. भागवतम् ४.२४.४३।
6. शब्दकल्पद्रुमः।
7. भागवतम् ९.८.२५।
8. ईशावास्योपनिषत् १६।
9. ज्योतिषतत्त्वविवेकः २.५६।
10. सूर्यजातकम् ३.६७।
11. हरिवंशम् २.२२।
12. स्कन्दपुराणम् ९.७८।
13. हरिवंशम् ४.१२.१५।
14. धातुपाठः १.६६२।
15. ऋग्वेदसंहिता ८.८.१४।
16. भागवतम् ५.२२.८।
17. हयग्रीवसंहिता ५.४.१-३।
18. याज्ञवल्क्यस्मृतिः १.५.२.१०।
19. महाभारतम्-आदिपर्व १.१७.५।
20. महाभारतम्-आदिपर्व १.१७.६।
21. महाभारतम्-आदिपर्व १.१७.८।
22. महाभारतम्-आदिपर्व १.१७.९।
23. महाभारतम्-आदिपर्व १.१७.१०।
24. वराहपुराणम् ८५.३।
25. महाभारतम् १३.१०६.१५।
26. महाभारतम् १३.१०९.३।
27. महाभारतम् १३.१००.३।
28. आपस्तम्भधर्मसूत्रम् १.१९।
29. तैत्तरीयसंहिता १.१.२.६।
30. महाभारतम् १२.१६६.२।
31. महभारतम् १२.१६६.८५।
32. देवीभागवतम् ६.६.७३।
33. ऋग्वेदसंहता १.६.१०।
34. ऐतरेयब्राह्मणम् १.१.१।
35. महाभारतम्-आदिपर्वः १.१८६.१६।
36. महाभारतम्-आदिपर्वः १.१८६.१९।
37. महाभारतम्-आदिपर्वः १.१८६.२०।
38. महाभारतम्-आदिपर्वः १.१८६.२१।
39. महाभारतम्-आदिपर्वः १.१८६.२२।
40. महाभारतम्-आदिपर्वः १.१८६.२३।
41. ऐतरेयब्राह्मणम् ७.७.६।